रत्नारत्नी रत्यन्ये। इति भरतः ॥ (यथा, महाभारते। ८। ७२। २७।
"अधररत्निसंघाताद्व्यूढ़ोरस्कः सुदुर्ज्जयः ॥")
रत्यङ्गं, क्ली, (रतेरङ्गम्।) योनिः। इति शब्दरत्नावली ॥
रथः, पुं, (रम्यतेऽनेनात्र वा। रम्+"हनिकुषिनीरमिकाशिभ्यः क्थन्।" उणा० २।२। इति क्थन्। अनुनासिकलोपश्च।) कायः। (यथा, गीतायाम्।
"आत्मानं रथिनं विद्धि शरीरं रथमेव च ॥")
चरणः। वेतसवृक्षः। इति विश्वः ॥ (अस्य पर्य्यायो यथा,—
"वेतसो नम्रकः प्रोक्तो वानीरो वञ्जुलस्तथा।
अभ्रपुष्पश्च विदुलो रथः शीतश्च कीर्त्तितः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
तिनिशवृक्षः। इति राजनिर्घण्टः ॥ चक्रविशिष्टयुद्धार्थयानम्। तत्पर्य्यायः। शताङ्गः २ स्यन्दनः ३। इत्यमरः। २। ८। ५१ ॥ स्यन्दनमात्रम्। इत्यन्ये ॥ (यथा, मनुः। ८।२९५।
"स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा।
प्रमापयेत् प्राणभृतस्तत्र दण्डोऽविचारितः ॥")
तद्द्वारा भ्रमणगुणाः।
"हस्त्यश्वरथदोलाद्यैर्भ्रमणं वातकोपनम्।
स्थिरीकरणमङ्गानां बल्यं वह्निविवर्द्धनम् ॥"
इति राजवल्लभः ॥ * ॥
रथविशेषाणां नामानि यथा,—
"युद्धार्थे चक्रवद्याने शताङ्गः स्यन्दनो रथः।
संक्रीडार्थः पुष्परथो देवार्थस्तु मरुद्रथः ॥
योग्यो रथो वैनायिकोऽध्वरथः परियानिकः।
कर्णीरथः प्रवहणं डयनं रथगर्भकः ॥
यानस्तु शकटोऽथ स्यात् गन्त्री कम्बलिवाह्यकम्।
अथ काम्बलवास्त्राद्यास्तैस्तैः परिवृते रथे ॥
नपाण्डुकम्बली यः स्यात् संवीतः पाण्डुकम्बलैः।
स तु द्वैपो वैयाघ्रश्च यो वृतो द्वीपिचर्म्मणा ॥"
इति हेमचन्द्रः ॥
गोलोकस्थ रथो यथा,—
"प्रदत्तं विप्रपत्नीभिर्म्मिष्टमन्नं सुधोपमम्।
बालकान् भोजयित्वा तु स्वयञ्च बुभुजे विभुः ॥
एतस्मिन्नन्तरे तत्र शातकुम्भरथं वरम्।
ददृशुर्विप्रपत्न्यश्च पतन्तं गगनाद्द्रुतो ॥
रत्नदर्पणसंयुक्तं रत्नसारपरिच्छदम्।
रत्नस्तम्भैर्निबद्धञ्च सद्रत्नकलसोज्ज्वलम् ॥
श्वेतचामरसंयुक्तं वह्निशुद्धांशुकान्वितम्।
पारिजातप्रसूनानां मालाजालविराजितम् ॥
शतचक्रसमायुक्तं मनोयायि मनोहरम्।
वेष्टितं पार्षदैर्दिव्यैर्व्वनमालाविभूषितैः ॥
पीतवस्त्रपरीधानै रत्नालङ्कारभूषितैः।
नवयौवनसम्पन्नैः श्यामलैः सुमनोहरैः ॥
द्विभुजैर्मुरलीहस्तैर्गोपवेशधरैर्व्वरैः।
शिखिपुच्छगुञ्जमालाबद्धवङ्किमचूड़कैः ॥
अवरुह्य रथात्तूर्णं ते प्रणम्य हरेः पदम्।
रथमारोहयां चक्रुस्तपुत्रांस्तत्कामिनीः ॥
विप्रभार्य्या हरिं नत्वा जग्मुर्गोलोकमीप्सितम्।
बभूवुर्गोपिकाः सद्यस्त्यक्त्वा मानुषविग्रहान् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १८ अध्यायः ॥
देव्या रथयात्रा यथा,—
ब्रह्मोवाच।
"भूयस्तं संप्रवक्ष्यामि देव्याराधनमुत्तमम्।
यत् कृत्वा सर्व्वकामानां प्राप्तिस्तृप्तिर्भविष्यति ॥
दन्तिदन्तमयैर्द्दिव्यैर्हेमबद्धैः सुशोभनैः।
विचित्रपद्मरागाद्यैर्म्मणिभिरुपशोभितैः ॥
रथस्तैः कारयेद्दिव्या सप्तभौमं मनोरमम्।
दुकूलवस्त्रसंछन्नमर्द्धचन्द्रोपशोभितम् ॥
घण्टाकिङ्किणिशब्दाढ्यं चामरैः कटकान्वितम्।
पताकाध्वजशोभाढ्यं दर्पणैरुपशोभितम् ॥
तं रथं पूजयेच्छक्र जातीकुसुममल्लिकैः।
पारिजातकपुष्पैश्च यक्षकर्द्दमचन्दनैः ॥
सुगन्धधूपितैः कृत्वा देवीं तत्र निवेशयेत्।
प्रतिमां शोभनां वत्स! महासुरभयङ्करीम् ॥
पूजयेदथ विन्यस्तां सर्व्वमङ्गलमङ्गलाम्।
दुर्गा कात्यायनी देवी वरदा विन्ध्यवासिनी ॥
निशुम्भशुम्भमथनी महिषासुरघातिनी।
प्रसीदतु सदा मेऽस्तु यच्च नो वाञ्छितं हृदि ॥
अनेन बलिपूर्व्वेण नमस्कारयुतेन च।
पूजयित्वा ततो नेया समस्ताम्बरगीतकैः ॥
पञ्चमी सप्तमी पूर्णा नवम्येकादशीषु च।
तृतीयाशिववविष्टिशदिवसेषूत्सवेषु च ॥
महानदीनदसंगमपर्व्वतस्तवगेषु च।
तत्र मण्डपविन्यासं महद्दाविवनिर्म्मितम् ॥
शैलं वा त्वष्टमयं वापि कृत्वा वास्तुविचारितम्।
सर्व्वलक्षणसंपूर्णं सर्व्वशोभासमन्वितम् ॥
पूर्व्वं च कारयेच्छक्र पश्चाद्यात्रां प्रचक्रिरे।
महाजनपदोपेतां महास्त्रीभिः ससङ्कुलाम् ॥
सर्व्वान्नपाननैवेद्यैः समस्तैरपि पूजयेत्।
दद्याद्बलिं शक्र सर्व्वं सर्व्वदिक्षु समन्ततः ॥
भूयो वेतालसंघस्य मन्त्रेणानेन सुव्रत!।
रक्ष मां निजभूतेभ्यो बलिं गृह्ण सदा प्रियम् ॥
मातर्मातर्वरे देवि! सर्व्वकामार्थसाधिनि।
अनेन बलिदानेन सर्व्वकामान् प्रयच्छ मे ॥
एवं दत्त्वा बलिं शक्र तथा देव्यावतारयेत्।
विन्यसेद्भद्रपीठे तु मण्डलैरुपशोभिताम् ॥
तत्रस्थां पूजयेद्देवीं हैमरूप्यैश्च ताम्रजैः।
कलसैस्तु सहस्रेण गन्धोदकसुपूरितैः ॥
समस्तफलसम्पूर्णैर्यज्ञियैरथ पल्लवैः।
स्नापयेदेकमेकेन रत्नगर्भैर्नवैर्दृढ़ैः ॥
वेदमङ्गलशब्देन शङ्खवादित्रनिस्वनैः।
वेणुवीणामृदङ्गैश्च घण्टाकिङ्किणिरावणैः ॥
स्नापयित्वा ततो देवीं निर्मञ्छेच्छनकैः शुभैः।
गोमयादिक्षतैः पञ्चैर्दीपवर्त्त्या विशोधितैः ॥
स्वस्तिकैर्नन्दिकावर्त्तैः शङ्खैर्नीलोत्पलोत्पलैः।
यवशाल्यङ्कुरोद्भिन्नैर्यवाचारैर्निर्मज्जयेत् ॥
प्रत्येकञ्च दहेद्धूपं प्रत्येकं कलसैः स्नपेत्।
तथा कर्पूरचोदेन चन्दनैः कुङ्कुमेन च ॥
गोरोचनासमेतेन देवीमालिप्य पूजयेत् ॥
हेमजैर्जातिजैर्माल्यै रत्नमाल्यैरनेकधा।
वासोभिः सुमनैश्चित्रैः पुनर्धूपं समुत्क्षिपेत् ॥
भक्षयेत तथा कन्या द्विजातीनथ दुःखितान्।
भक्ष्यभोज्यान्नपानेन तत्र सर्व्वांश्च प्रीणयेत् ॥
भोजयित्वा क्षमायेत देवि मे प्रीयतामिति।
रथे कृत्वा तथा देवीं पुनरेव गृहं नयेत् ॥
महता जनसंघेन समस्तविभवान्वितैः।
शान्तरेणुपथं सर्व्वं पुष्पदूर्व्वाचतैर्ज्जलैः ॥
प्रक्षिप्यमाणैः कन्याभिः स्त्रीभिर्मङ्गलवादिभिः।
सलिलेन यथा पांशुं कृत्वा पङ्कं प्रचक्रिरे ॥
पुरशोभां पथे शोभां द्वारशोभां गृहे गृहे।
कारयीत तथा शक्र सर्व्वबाधां निवारयेत् ॥
अच्छेद्यास्तरवस्तस्मिन् प्राणिहिंसां विवर्ज्जयेत्।
बन्धनस्था विमोक्तव्या वध्याः क्रोधादिशत्रवः ॥
अकालकौमुदीं शक्र रथयात्रान्तु कारयेत्।
सर्व्वदा सर्व्वदेवैस्तु शङ्कराद्यैः प्रतिष्ठिता ॥
रथयात्रा तदा शक्र सुरैः स्वर्गे सदा कृता।
तथा किन्नरगन्धर्व्वैर्भूपातालनिवासिभिः ॥
रथयात्राप्रभावेण मोदन्ते दिवि देवताः।
आदित्यो रथयात्राकृद्रथेन नभसः क्रमेत् ॥
देवो दिव्यविमानस्था रथयात्राप्रभावतः।
क्रीड़न्ते विविधैर्भोगैः सर्व्वातङ्कविवर्जिताः ॥
तथा त्वमपि देवेन्द्र! रथयात्राकरो भव।
शिवायाः शिवदायास्तु परमेण समाधिना ॥
अगस्त्य उवाच।
रथयात्राकृतं पुण्यं ब्रह्मणो वासवस्य तु।
पूर्व्वं यत् कथितं तात तत्ते सर्व्वं मयाखिलम् ॥
ख्यापितं नात्र सन्देहो देवीमाहात्म्यमुत्तमम्।
यः पठेत् शृणुयाद्वापि भक्तिमान् नृपसत्तम ॥
स सुखं यशः सौभाग्यं पुत्त्रप्राप्तिमथेप्सिताम्।
लभते नात्र सन्देह इत्येवं ब्रह्मणोऽब्रवीत् ॥
स्वबलेन कृते राज्ये पुरा शक्रस्य कीर्त्तिता।
धनदस्य पुरीप्राप्तिर्व्वरुणस्य च वायुना ॥
हृते स्थाने कृता तेन तथा श्रुत्वा च निर्ऋतेः।
भुञ्जते परया हृष्टा पुरीर्भोगवतीः शुभाः ॥"
इति देवीपुराणे रथयात्राविधिमाहात्म्यम् ३९ अध्यायः ॥ * ॥ नवग्रहाणां रथा यथा,—
"योजनानां सहस्राणि भास्करस्य रथो नव।
ईशादण्डस्तथैवास्माद्द्विगुणो द्विजसत्तमाः ॥
सार्द्धकोटिस्तथा सप्त नियुतान्यधिकानि तु।
योजनानान्तु तस्याक्षं तत्र चक्रं प्रतिष्ठितम् ॥
त्रिनाभिमतिपञ्चारे षण्णेमिन्यक्षयात्मके।
संवत्सरन्तु यत् कृत्स्नं कालचक्रं प्रतिष्ठितम् ॥
चत्वारिंसत्सहस्राणि द्वितीयोऽक्षो विवस्वतः।
पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य द्विजोत्तमाः ॥
अक्षप्रमाणमुभयोः प्रमाणं तत्पराद्धयोः।
भूयोऽक्षस्तद्युगार्द्धं च ध्रुवाधारं रथस्य वै ॥
द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले।
हयाश्च सप्त छन्दांसि तन्नामानि निबोधत ॥
गायत्री च बृहत्युष्णिक् जगती पंक्तिरेव च।
अनुष्टुप् त्रिष्टुबित्युक्ताश्छन्दांसि हरयो रवेः ॥"१ ॥
इति कौर्म्मे ३८ अध्यायः ॥